बहिःक्रियया कुण्डमण्डलादिपूर्वको निर्वर्त्यमानो[११९] विधिः सर्वोऽपि मनसैव क्रियते चेत् सा मानसीत्यभिधीयते । तथा ज्ञानरत्नावल्याम्–
मानसं विधिमाश्रित्य मानसी ज्ञानवत्यसौ । इति ।
अथ शास्त्रीमाह–

शास्त्रस्य सम्प्रदानेन शास्त्रदीक्षा समीरिता ॥ १९ ॥

शास्त्रस्य कामिकादिशिवशास्त्रस्योपदेशेन शास्त्रदीक्षा । इयं च समय-संस्कारानन्तरमेव कर्तव्या । अन्यथा शिवशास्त्रश्रवणाधिकाराभावात् ।

---

[११६] प्रवर्तताम्] C; प्रकीर्तिता T, T1, M1, R
[११७] व्याप्तहृदयकमलस्थितशिवतेजसा] C2, C3; व्याप्तकमलस्थित° C1
[११८] प्रवृत्ता] C2 ; प्रवक्ता C1, C3
[११९] निर्वर्त्यमानो] C2; निर्वर्त्यमानोऽपि C1, C3

अत एव शिवशास्त्रश्रवणमपि दीक्षाभेद एव । तथा च सिद्धान्तशेखरे–
शास्त्रस्य सम्प्रदानेन शास्त्रदीक्षा निगद्यते[१२०] । इति ।
अथ योगदीक्षामाह–

योगेन योगदीक्षा स्याच्छिवत्वेऽस्य[१२१] व्यवस्थिता ।

योगेन धारणादियोगोपदेशेन योगदीक्षा स्यात् । एतद्रूपं दीक्षादर्शेऽस्माभिः प्रपञ्चितं तत्रावधार्यताम् । इयं च अस्य शिष्यात्मनः शिवत्वे शिवपदप्राप्तौ व्यवस्थिता निश्चिता । अन्यासां रुद्रपदप्राप्तिरीश्वरपदप्राप्तिश्चाधिकारानुगुणात् फलं भवतीति भावः । अत एव इयमपि समयादिसंस्कृतस्यैव कर्तव्येति भावः । तथा चिन्त्यविश्वे (२६:१उ–३पू)–
युजिर्योगेति धात्वर्थे यज्जीवशिवयोरपि ।
संश्लेषो योग इत्युक्तः सहमार्ग इति स्फुटम् ।
असद्भावक्षयत्वं च ज्ञानसद्भावभावकम् ।
शिवतत्त्वेति संयोगो योगदीक्षेति कथ्यते ।
अथ हौत्रीमाह–

रजःकुण्डवती हौत्री सा द्विभेदा किलोदिता ॥ २० ॥

अत्र रजश्शब्देन ईशानाद्यनुगुणवर्णरजःसाध्यमण्डलान्युच्यन्ते । तथा च कुण्डमण्डलपूर्वकं वह्निव्यापारं निर्वर्त्य समयविशेषादिदीक्षा हौत्री । सा च द्विभेदा द्विप्रकारा । ननु अस्याप्येकत्वादिबहुप्रकाराणां सम्भवात् कथं द्विभेदत्वमेवेत्याशङ्क्य संक्षेपादित्याह–

समासाच्च द्विधैवेयं[१२२] दीक्षा तज्ज्ञैरिहोच्यते ।

इयं दीक्षा साधिकारिणां हौत्री । तज्ज्ञैर्दीक्षास्वरूपज्ञैराचार्यैरिति शेषः ।

---

[१२०] निगद्यते] C1, C3; समीरिता C2

[१२१] शिवत्वेऽस्य] C, ; शिवत्वे सा T, T2, M1, R

[१२२] समासाच्च द्विधैवेयं] C, M1, T2; समासाच्च द्विधा चेयं R, T; समासाद्विविधैवेयं T1

इह अस्मिन् शास्त्रे द्विविधा द्विप्रकारैवेत्युच्यते । तद्द्वैविध्यमाह–

ज्ञानवती भवेदेका[१२३] क्रियावत्यपरा स्मृता ॥ २१ ॥

एका ज्ञानवती भवेत् अपरा क्रियावतीति स्मृता । तत्र ज्ञानवत्या लक्षणमाह–

विनेज्यानलकर्मादि मनोव्यापारमात्रतः ।
दीक्षा ज्ञानवती प्रोक्ता सम्यक् तत्त्वावबोधजा ॥ २२ ॥

इज्या यागः दीक्षायां क्रियमाणा होमादिः देवतोद्देशेन द्रव्यत्याग इति वचनात्। अनलकर्म कुण्डसंस्काराग्निसंस्कारादि कर्म आदिशब्देन मण्डपमण्डलार्चनादि । एतत् सर्वं विना मनोव्यापारमात्रतः मानसव्यापारमात्रकार्येत्यर्थः। सा च सम्यक्तत्त्वावबोधजा दृढतरं शिवक्रियाकलापयोर्याथार्थ्यज्ञानजन्या दीक्षा ज्ञानवतीति प्रोक्ता । अन्यथा तस्या असाध्यत्वात् । तदुक्तं चिन्त्यविश्वे(३९:१२–१३)

पूर्वोक्तदीक्षया युक्तं शिष्यं विज्ञानदीक्षया ।
दीक्षयेत् कृपया पूर्णो गुरुः सन्मार्गदायकः ।
मनोव्यापारमात्रेण या दीक्षा क्रियते[१२४] क्रमात् ।
सा दीक्षा ज्ञानदीक्षा तु विज्ञानाख्या च वै भवेत् ।
दीयते तच्छिवत्वं हि क्षीयते सर्वसंशयः ।
एवं विशिष्टरूपत्वाद्विज्ञानमिति कीर्तितम् ।

अथ क्रियावत्या लक्षणमाह–

इज्यानलवती[१२५] या तु क्रियाकौशलसम्भवा ।
क्रियावती

इज्या हवनरूपो यागः । अनलः अग्निकार्यसंस्कृतोऽग्निस्तदुभयमस्यास्तीति

---

[१२३] ज्ञानवती भवेदेका] C, T1; ज्ञानवती भवत्येका M1, R, T; एका ज्ञानवती प्रोक्ता T2

[१२४] क्रियते] सम्पादकीयम् ; विवृते C; विद्यते इति अचिन्त्यविश्वसादाख्यस्य हस्तलिखितमातृकायाम् ;

[१२५] इज्यानलवती] C, M1, T, T2, M1, R; आज्यानलवती T2

इज्यानलवती । क्रियाकौशलेन कुण्डमण्डपनिर्माणाद्याचार्यक्रियासामर्थ्येन सम्भवतीति क्रियाकौशलसम्भवा । या दीक्षा सा क्रियावती । अस्या एव भेदमाह–

अथानेका[१२६] निर्बीजा च[१२७] सबीजका ॥ २३ ॥

निर्बीजदीक्षा सबीजदीक्षा चेति अनेका एका न भवतीत्यनेका द्विविधेत्यर्थः। अथोभयोरपि स्वरूपभेदं निरूपयितुं प्रथमं विषयभेदमाह–

तत्र निर्बीजिका या सा समयिन्यथ पुत्रके[१२८] ।
सबीजा तु भवेद्दीक्षा साधकाचार्ययोरपि ॥ २४ ॥

अत्र बीजशब्देन समयाचार उच्यते । तद्रहिता निर्बीजिका । निर्बीजैव निर्बीजिका निरपेक्षेति च । नाम्नः स्वार्थे कप् । या सा समयिनि समयाख्ये दीक्षिते पुत्रके पुत्राख्ये दीक्षिते सम्भवति । आचार्यो यं समयिनं पुत्रं चिकीर्षति तस्य कर्तव्येत्यर्थः । इयं निर्बीजा च सद्योनिर्वाणदा असद्योनिर्वाणदेति द्विविधेत्याह–

अथ निर्बीजिका[१२९] दीक्षा प्रोक्ता सा द्विप्रकारिका ।
एका निर्वाणदा सद्यो द्वितीया देहपाततः *॥ २५ ॥

दीक्षानन्तरमेव मोक्षदा सद्योनिर्वाणदा । एतद्देहपातानन्तरं मोक्षदा असद्यो निर्वाणा[१३०] । इयं च केषां[१३१] कार्येत्यत आह–

बालबालिशवृद्धस्त्रीभोगभुग्व्याधितात्मनाम् ।

---

[१२६] अथानेका] C, M1, T2; अथ सानेका R, T

[१२७] च] C, M1, T2; अथ R, T

[१२८] समयिन्यथ पुत्रके] C, R, T; योज्या समयिपुत्रयोः M1

[१२९] निर्बीजिका] C, R, T; निर्बीजका M1, T2

[१३०] असद्योनिर्वाणा] C1; असद्योनिर्वाणदा C3

[१३१] केषां C3; केषांचित् C1

* चाक्षुषादिविभेदेन या दीक्षा समयी स्मृता ।

भवेन्निर्बीजिका दीक्षा समयाचारवर्जिता[१३२] ॥ २६ ॥

बाला उपनीतमात्राः बालिशा मूकाः । मूकवैधेयबालिशा इत्यमरः । वृद्धा जरातुराः । स्त्रियो भक्तिमत्यः । भोगभुजः अभिलाषपीडिताः । व्याधितात्मानः क्षयकुष्ठादिव्याध्यावृतदेहाः । एतेषां निर्बीजिका दीक्षा । सा तु समयाचारशुद्धिदा । बालादीनां समयाचारानुष्ठाने सामर्थ्याभावाद्दीक्षाकाल एव समयाचारः । यत्राचार्येण तत्तधिकारिभेदसामर्थ्यवशादाकृष्य शोध्यन्ते तेन शुद्धिदा । तथा च ज्ञानरत्नावल्याम् –

बालाबलादीनां समयाद्यनुष्ठानापेक्षया विना मोक्षप्रदाननिरपेक्षा निर्बीजाख्या। इति । उदाहृतं च–

समयाद्यक्षमं वृद्धं मूढबालाबलादिकम् ।
यासौ तदनपेक्षत्वान्निरपेक्षा निगद्यते । इति ।

अथ सबीजां सापेक्षापरपर्यायामाह–

विदुषां च समर्थानां सबीजा परिकीर्तिता ।

विदुषां शास्त्रज्ञानवतां समर्थानां समयाचारानुष्ठाने शक्तानां च सबीजा सापेक्षापरपर्याया परिकीर्तिता कर्तव्येति शेषः । तथा च ज्ञानरत्नावल्याम्–
सह समयाद्यनुष्ठानेनाहिंसाद्यात्मगुणैः पुरुषगतैरपेक्षा यस्याः सा सापेक्षा सबीजाख्या । उदाहृतं च उक्तं च–

शार्वं नयति या धाम समयाद्यनुवर्तकम् ।
विशिष्टात्मगुणप्रायं सापेक्षा सोच्यते बुधैः । इति ।

अथ सबीजायामपि द्वैविध्यं तद्विषयभेदेनाप्याह–

सबीजा च द्विधा भिन्ना प्रथमा शिवधर्मिणी ॥ २७ ॥
साधकाचार्ययोः सोक्ता देशकालादिभेदतः ।

निराधारेण गुरुणा सद्योनिर्वाणदा कृता ।
साधारेण कृता सा चेन्मुक्तिदा देहपाततः । इत्ययं सार्धैकश्लोकः R, T मातृकयोः अधिकं वर्तते ।

[१३२] समयाचारवर्जिता C, M1, T2; °शुद्धिदा R, T

सबीजदीक्षा च द्विधा भिन्ना । तत्र प्रथमा शिवधर्मिणी । सा च साधकाचार्ययोर्देशकालादिभेदतः उक्ता । देशकाललक्षणं सिद्धान्तशेखरे–

नद्यब्धिगिरिसत्तीर्थपुण्यारण्यसमीपतः ।
शिवक्षेत्रे शिवागारसमीपे वा शुभे गृहे ।
देशे विशोधिते शुद्धे तत्र कुर्वीत मण्डपम् । इति ।

दीक्षामण्डपलक्षणमस्माभिः कृतदीक्षादर्शे प्रपञ्चितं तत्रावधार्यताम् । कालस्तु शक्तिनिपाततारतम्यकाल एव । अत एव शक्तिनिपाततारतम्यवशादेव सद्योनिर्वाणाद्यनेकविधदीक्षाभेदः सम्भवति । अथवा त्रिलोचनशिवाद्युक्तलौकिकादिकाला वा ग्राह्याः । तद्यथा सिद्धान्तसारावल्याम्(क्रियापाद, ५९)–

काले वार्षिकपौषचैत्ररहिते देवोत्सवे दामने
संक्रान्तौ विषुवेऽयने ग्रहणयोर्दीक्षा पवित्रोत्सवे ।
मैत्रार्कानिलसौम्यपैत्रनिऋतीपूषाख्यशाङ्गीश्वरे
जैवं रोहिणिकोत्तरत्रयमथो भौमार्कवारं विनेति ।

एवं शिवधर्मिण्यां विषयभेदमुक्त्वा तत्स्वरूपमाह–

धर्माधर्मात्मकं कर्म प्रागागामि विचित्रकम् ॥ २८ ॥
संचिन्त्य शोध्यते यत्र सैवोक्ता शिवधर्मिणी ।

प्राक् प्राक्तनं संचितमित्यर्थः । आगामि इहजन्मनि जन्मान्तरे वा भोज्यं धर्माधर्मात्मकं पुण्यपापस्वरूपं विचित्रकं भोगवैचित्र्यान्नानाविधं सर्वं कर्म संचिन्त्य मनसा उल्लिख्य यत्र यस्यां शोध्यते तत्तद्भोगानुगुणा इति प्रदानवशादेव फलजननार्हं क्रियते सैव शिवधर्मिणी दीक्षोक्ता । लोकधर्मिण्याः स्वरूपमाह–

अधर्ममात्रसंशुद्धौ द्वितीया लोकधर्मिणी[१३३] ॥ २९ ॥

तत्तद्भुवनादिषु सद्भोगार्थं धर्ममात्रं कर्म व्यवस्थाप्य अधर्ममात्रस्य सर्वेषाम–

---

[१३३] दीक्षया लोकधर्मिण्या गृहस्थान् दीक्षयेद्गुरुः इतीदमर्धं मूलग्रन्थत्वेन M1 मातृकायां वर्तते । परमिदमर्धं तथान्यत्रापीति ग्रन्थान्तरात् व्याख्याकारेणोल्लिखितम् ।

धर्माणां संशुद्धौ पूर्वोक्तप्रकारेण शोधने कृते सति सामर्थ्ये मात्रशब्दः । इयं लोकधर्मिण्याख्या द्वितीया सबीजदीक्षा । अत एव लोकेषु तत्तदपेक्षितभुवनेषु भोगार्थं धर्मा अस्यां सन्तीति लोकधर्मिणी । शिवधर्मः शिवत्वमस्यास्तीति शिवधर्मिणीति दीक्षासार्थकत्वम् । इयं च परापरभेदेन द्विधा भवति । तत्र परा साक्षात् परशिवत्वप्राप्तिहेतुः । अपरा तु देहभङ्गव्यतिरेके स्वेच्छापरिगृहीतदिव्यशरीरेण यथेष्टभोगभुवनेषु यथेष्टभोगानन्तरं परशिवत्वप्राप्तिहेतुः । तथा बालज्ञानरत्नावल्याम्–

शिवधर्मिण्यणोर्मूलं शिवधर्मफलश्रियः ।
परेतरान्विना भङ्गं तनोराविलयाद्ध्रुवम् । इति ।

लोकधर्मिणी च परापरभेदेन द्विधा । तत्र परा तत्र तत्र भुवनेषु भुक्तभोगस्य देहोत्तरकालमेव शिवत्वप्राप्तिहेतुः । अपरा तु भोगार्थिनोऽपि देहोत्तरमणिमादिसिद्धिप्रदा । तदुक्तं बालज्ञानरत्नावल्याम्–

भोगभूमिषु सर्वासु दुष्कृतांशे[१३४] हते सति ।
देहोत्तरमणिमाद्यर्थं शिष्टेष्टा लोकधर्मिणी । इति ।

अणिमादिसिद्धयश्च साञ्जना निरञ्जनाश्च । तत्र साञ्जनाः पातञ्जलादि–योगशास्त्रसिद्धाः निरञ्जनास्तु शैवमन्त्रसाधनसामर्थ्यसिद्धाः। तदुक्तं कामिके–

काम्याश्च सिद्धयो ज्ञेया सिद्धयो बहुधा स्मृताः ।
कन्यसं भूपतित्वं च मध्यमं विलसिद्धयः ।
उत्तमं खेचरित्वं च श्रेष्ठं देवसमानता ।
विद्यते बहुधैकैकं विद्येशत्वादिभेदतः ।
विद्येशत्वं च रुद्रत्वं ब्रह्मत्वं वैष्णवं पदम् ।
मायाकार्येऽमरेशादिरुद्रस्थानेषु यत्सुखम् ।
अपरं तत् परं विद्यादनन्तादिपदस्थितिः । इति ।

पूर्वोक्तशिवधर्मिणिलोकधर्मिण्योर्दीक्षायामधिकारनिरूपणं प्रकारान्तरेण स्वरूपं

---

[१३४] दुष्कृतांशे] C3; दुष्कृतेंऽशे C1

निरूपयति[१३५] तथा च ज्ञानरत्नावल्यामुदाहृतम् । तद्यथा
द्वेधा निर्वाणदीक्षा सा लौकिकी शिवधर्मिणी ।
गृहिणां लौकिकी ज्ञेया लिङ्गिनां शिवधर्मिणी ।
शिखाच्छेदो न यत्रास्ति दीक्षा सा लोकधर्मिणी ।
शिखाखण्डनसंयुक्ता दीक्षा सा शिवधमिणीति ।
तथा मायातत्त्वविशुद्धौ तु शिखां यस्यां विनिर्दहेत् ।
शिवधर्मित्वसंख्या तु सा दीक्षा शिवधर्मिणीति ।
शिखाच्छेदं विना यान्या दीक्षा सा लोकधर्मिणी ।
तथान्यत्रापि–
दीक्षया लोकधर्मिण्या गृहस्थान् दीक्षयेद्गुरुः ।
तथैव शिवधर्मिण्या दीक्षयेच्च तपोधनानिति[१३६] ।
पुनश्च साधिकारनिरधिकारभेदाद्द्वैविध्यं विषयभेदादाह–

नित्यमात्राधिकारित्वात् समयिन्यपि पुत्रके ।
दीक्षा निरधिकारैव नैमित्तानधिकारिणी ॥ ३० ॥

नैमित्तानधिकारिणी नैमित्तिकाख्यदीक्षाप्रतिष्ठादिकर्मणामधिकारानर्हे समयिनि पुत्रकेऽपि नित्यमात्राधिकारित्वाद्धेतोर्दीक्षा निरधिकारैव । नैमित्तिकाद्यधिकाररहितैव । साधकाचार्ययोः साधिकारेत्याह–

साधकाचार्ययोर्नित्यनैमित्तकाम्यकर्मसु[१३७] ।
*सर्वत्रैवाधिकारित्वात्[१३८] साधिकारैव सा तयोः[१३९] ॥ ३१ ॥

साधकाचार्ययोर्नित्यनैमित्तिककाम्यकर्मसु सर्वकर्माधिकारित्वादेव सा दीक्षा तयोः साधकाचार्ययोः साधिकारैव ।

---

[१३५] °निरूपणं ज्ञानरत्नावल्यामुदाहृतम्] C3; °निरूपणं प्रकारान्तरेण स्वरूपं निरूपयति C1

[१३६] तथान्यत्रापि । । । तपोधनानिति पर्यन्तं C3 मातृकायां नास्ति ।

[१३७] नैमित्तकाम्य°] R ; नैमित्तिककाम्यकर्मसु C1; नैमित्तिकाम्य° C2, C3;

[१३८] सर्वत्रैवाधिकारित्वात्] C, R; सर्वत्रैवाधिकारत्वात् R; सर्वत्राप्यधिकारित्वात् M1

[१३९] सा तयोः] C3, R, T, T2 ; सानयोः C1

तथा कालोत्तरे[१४०] –

नित्यादित्रितयं कार्यं व्याख्यानं देशिकेन तु ।
नित्यं काम्यं साधकस्य स्वशास्त्रोक्तं षडानन ।
समयिपुत्रकाभ्यां तु नित्यमेव प्रकीर्तितम् । इति ।

अथ समयिपुत्रकसाधकाचार्याणां दीक्षाभेदादेव लक्षणभेद इति दर्शयन्नाह–

यत्र रुद्रपदे योगो योगो विद्येश्वरे पदे ।
शिखाच्छेदो न यत्रास्ति दीक्षा सा समयी द्विधा ॥ ३२ ॥

यत्र समयदीक्षायां रुद्रपदे शिष्यसंयोजनं सैका यत्र ईश्वरपदे योगः शिष्यस्य संयोजनं सा अपरेति[१४१] सा समयी समयदीक्षा द्विधा । यत्र शिखाच्छेदो नास्तीत्येतत् । वस्तुतः समयदीक्षायां शिखाच्छेदाभावात् स्वरूपकथनमात्रमेव न तु लक्षणेऽन्तर्भूतम् । तत्र शिखाच्छेदस्य निर्वाणदीक्षाङ्गत्वादेवाप्रसक्तेः। तथा च रुद्रपदप्रापकसमयदीक्षासंस्कृतः समयी ईश्वरपदप्रापकविशि–ष्टसमयदीक्षया संस्कृतः पुत्रक इति लक्षणमुक्तं भवति । एवं च समयदीक्षामात्रेण रुद्रपदप्राप्तिः समयविशेषाभ्यामीश्वरपदप्राप्तिरित्यप्युक्तं[१४२] भवति । अथाभिषेकरहिता निर्वाणदीक्षा[१४३] पुत्रके भवतीत्याह–

यत्र पाशशिखाच्छेदो योगः शिवपदे भवेत् ।
निर्वाणाख्या तु सा सैव पुत्रके नाभिषेकतः ॥ ३३ ॥

यत्र दीक्षायां पाशशिखाच्छेदः । निवृत्त्यादिपञ्चकलास्थाना–वशिष्टसूत्रशिखाच्छेदः यत्र च शिवदेवयोगः[१४४] सा निर्वाणाख्या दीक्षा तु पुत्रके भवेत् कार्येत्यर्थः । सैवाभिषेकतो न अभिषेकरहितेत्यर्थः । तथा च अनभिषेकनिर्वाणदीक्षितोऽपि पुत्र इत्यर्थः । निर्वाणदीक्षायामपि

---

* सर्वत्रैव . . . सा तयोः इतीदमुत्तरार्धं C2 मातृकायां नास्ति ।

[१४०] तथा कालोत्तरे] C3; कालोत्तरे C1

[१४१] सा अपरेति] C3; सा परेति C1

[१४२] °पदप्राप्तिरित्यप्युक्तं] C3 ; °पदप्राप्तिरित्युक्तं C1

[१४३] °दीक्षा] C1; °दीक्षाऽपि C3

[१४४] शिवपदयोगः] C3; शिवदेवयोगः C1

साध्यमन्त्राभिषेकेण साधकः सर्वविद्याभिषेकेणाचार्य इत्याह–

साध्यमन्त्राभिषेके[१४५] च साधके सा प्रकीर्तिता ।
सर्वविद्याभिषेकेण भवेत् साऽऽचार्यगोचरे ॥ ३४ ॥

यस्य मुक्तिं विना अणिमादिसिद्धिसाधनापेक्षा[१४६] येन मन्त्रेण भवेत् स च मन्त्रस्तस्य साध्यो भवति । तेन मन्त्रेणाभिषेकात् सा दीक्षा साधके सा[१४७] प्रकीर्तिता । तथा च साध्यमन्त्राभिषिक्तः साधक इति लक्षणम् । सर्वविद्याभिषेकेण तु सर्वमन्त्रैरभिषेकेण तु सा दीक्षा आचार्यगोचरे आचार्यविषये भवेत् । तथा च सर्वविद्याभिषिक्त आचार्य इति लक्षणमुक्तं भवति । षट्सहस्रिकायां[१४८] च–

एवं ज्ञात्वा प्रयत्नेन लयभोगौ प्रकल्पयेत् ।
अज्ञात्वा लयभोगौ तु यो दीक्षां कुरुते गुरुः ।
आचार्यः सह शिष्यैस्तु नरके रौरवे पचेत् ।
देशिकस्तु प्रयत्नात्तु ज्ञात्वा दीक्षां समाचरेत्[१४९] ।

एवं दीक्षाबीजज्ञानार्थमधिकारभेदवशात् दीक्षाभेदं प्रतिपाद्य निगमयति–

शिवसंस्कारयुक्तस्य यच्छिवत्वसमर्पणम् ।
क्रियया वाथ शक्त्या वा दीक्षा सा सर्वतो मता ॥ ३५ ॥

क्रियया वा कुण्डमण्डपपूर्विकया वा अथ वा शक्त्या मनोव्यापार-भूतज्ञानदीक्षया वा । शिवसंस्कारयुक्तस्य साधिकरणनिरधिकरणशिव-कृतसंस्कारस्य यद्यस्मात् कारणाच्छिवत्वसमर्पणं भवति तस्मात् सा पूर्वोक्तचाक्षुष्याद्यनेकभेदभिन्ना दीक्षा सर्वतः प्रलयाकल-विज्ञानाकलसकलभेदभिन्नत्रिविधसर्वपशुषु मता । शक्तिपात-वशात्तदधिकारानुरोधेन कार्येत्यर्थः । तथा वामदेवे–

---

१४५ साध्यमन्त्राभिषेके च] C ; °मन्त्राभिषेकाच्च M1, R, T, T2

१४६ मुक्तिं विना अणिमादिसिद्धिसाधनापेक्षा] C3; मुक्तिर्विनाणीमाणिसिद्धि° C1

१४७ सा इति पदं C3 मातृकायां नास्ति ।

१४८ षट्सहस्रिकायां] C1; कालोत्तरे C3

१४९ षट्सहस्रकालोत्तरागमस्य हस्तलिखितमातृका, French Institute संस्थायां विद्यमाना,

ज्ञानेन क्रियया वाथ गुरुः शिष्यं विशोधयेत् ।
एवं दीक्षां प्रतिपाद्य फलप्रदानेन निगमयति–

दीक्षया मुच्यते देही त्रिविधाद्भवबन्धनात् ।

देहिशब्देन जात्येकवचनम् । त्रिविधपशुरपि त्रिविधात् भवबन्धनान्मलमायाकर्मरूपात् संसारपाशान्मुच्यते मुक्तो भवति । अथाध्वशुद्धिपरिज्ञानस्यापि दीक्षाबीजतया वर्णयितुं स चाध्वा षड्विध इत्याह–

सा च दीक्षाध्वसंशुद्धिः स चाध्वा षड्विधः स्मृतः ॥ ३६ ॥

सा संसारमोचिका[१५०] दीक्षा चाध्वसंशुद्धिः अध्वसंशुद्धिरूपा स दीक्षाङ्गभूताध्वा च षड्विधः स्मृतः । ता एव विधाः[१५१] संहारक्रमेणोद्दिशति–

मन्त्राध्वा च पदाध्वा च वर्णाध्वा भुवनाध्वकः[१५२] ।
तत्त्वाध्वा च कलाध्वा च विशत्येकं पदं शिवम् ॥ ३७ ॥

मन्त्रपदवर्णभुवनतत्त्वकलारूपषड्विधो वापि एकं सर्वोत्तरतया मुख्यं शिवं शिवतत्त्वाख्यं पदं विशति लयं तत्रैव याति दीक्षया इति शेषः । तथा च दीक्षया मन्त्रादिषडध्वनां शिवतत्त्वे संक्षिप्य शोधने कृते सत्यग्निदग्धबीजानामिव तेषां पुनर्न भोगार्हत्वम् । अनेन शैवमुक्तानां शिवतत्त्व एव सर्वोत्तरभूते दीक्षया संयोजनेन शिवतत्त्वाभिव्यक्तिर्मुक्तिरिति गम्यते ।

मुक्तः सृष्टौ पुंवरोऽभ्येति नाधः । इति मृगेन्द्रवचनेन[१५३] शिवतत्त्वादधस्तेषां पुनर्निवृत्त्यभावात् पुनरावृत्तिरहितत्वमेव खलु परमुक्तत्वम् । मन्त्रादिषडध्वनां

T. ७६७ अङ्किता, ४१ तमपृष्टे, ५७२–५७३ श्लोकौ ।

[१५०] संसारमोचिका] C3; संसारविमोचिका C1

[१५१] एव विधाः] C3; एवंविधाः C1

[१५२] भुवनाध्वकः] C; भुवनाध्वकम् T; भुवनात्मकः R, T1, M1

[१५३] मृगेन्द्रवचनेन] C3; वचनेन C1

च उत्तरोत्तरव्यापकतया विभाव्य शोधनं कर्तव्यमिति तद्व्याप्तिप्रकारमेवाह–

मन्त्राः पदानि वर्णैश्च व्याप्तानि सकलं ततः[१५४] ।
वर्णास्तु भुवनैर्व्याप्तास्तत्त्वैर्व्याप्तानि तानि च ॥ ३८ ॥
कलाभिस्तानि तत्त्वानि व्याप्तानीह कलाः क्रमात् ।
शोधनीयान्विभाव्यैवं[१५५] पञ्च पञ्चाध्वगर्भिताः ॥ ३९ ॥

मन्त्राः पदैर्व्याप्ताः पदानि च वर्णैर्वर्णाश्च भुवनैर्भुवनानि च तत्त्वैस्तत्त्वानि च कलाभिर्व्याप्तानीत्येवं पञ्च कला अपि क्रमात् पञ्चाध्वगर्भिता विभाव्य शोधनीयाः । तथा चोक्तं त्रिलोचनशिवाचार्यैः(सिद्धान्तसारावलि, क्रियापाद, १०३)–

व्याप्यव्यापकभावनात्र हि पदे मन्त्राः पदान्यक्षरैः वर्णास्ते भुवनैश्च तानि च तया व्याप्तानि तत्त्वैरिमे ।
व्याप्या कर्ममलाख्यमोहकभवा ये व्यापकास्तेऽप्यमी व्याप्यव्यापकभावगा इह कलास्ताभिर्गृहीता इमे ।

कलानां पञ्चाध्वगर्भितत्वमेव प्रतिपादयितुं तासां शोधनस्थानान्यप्याह[१५६] –

निवृत्तिश्च प्रतिष्ठा च विद्याशान्तिश्च नाभसी ।
कला हृत्कण्ठतालुभ्रूब्रह्मरन्ध्रावधि क्रमात् ॥ ४० ॥

अत्र नाभसिशब्देन शान्त्यतीतोच्यते । तत्सम्बन्धित्वात्तस्या निवृत्तिप्रतिष्ठाविद्याशान्तिशान्त्यतीतेत्येताः कलाः क्रमेण हृत्कण्ठतालु-भ्रूब्रह्मरन्ध्रावधि एतेषु स्थानेषु विभाव्य शोधनीया इत्यन्वयः । अथ निवृत्त्यादिपञ्चकलासु तत्त्वादिपञ्चाध्वनां शोधनार्थं संक्षेपं प्रकारं क्रमेणाह–

निवृत्तौ पार्थिवं तत्त्वं चिन्त्यमेकं क्षमक्षरम् ।
कालाग्निप्रभृतीनां तु पुरमष्टोत्तरं शतम् ॥ ४१ ॥

---

[१५४] व्याप्तानि सकलं ततः] C; व्याप्तानीह समन्ततः R, T, M1
[१५५] शोधनीयान्विभाव्यैवं] C ; शोधनीया विभाव्यैवं T, M1
[१५६] शोधनस्थानान्यप्याह] C3; शोधनसामान्यान्यप्याह C1

अन्त्यात् पदान्महादेवपदावधि विलोमतः ।
व्योमव्यापिपदान्यष्टाविंशतिः परिसंख्यया ॥ ४२ ॥
सद्योजातश्च हृदयं द्वौ[१५७] मन्त्रौ परिकीर्तितौ ।
गुणा गन्धादिशब्दान्ताः पञ्च ब्रह्मा च कारणम् ॥ ४३ ॥

निवृत्तौ निवृत्तिकलायां पार्थिवं तत्त्वं पृथिवीतत्त्वमेकं चिन्त्यं शोधनार्थमन्तर्भाव्यं[१५८] तत्त्वाध्वायम् । अक्षरं तु क्षकारः[१५९] वर्णाध्वायम् । कालाग्निप्रभृतीनां पुरां भुवनानामष्टोत्तरं शतम्[१६०] अयं भुवनाध्वा । अन्त्यात् पदादारभ्य महादेवपदावधि विलोमतः प्रातिलोम्येन व्योमव्यापिपदानि परिसंख्यया अष्टाविंशतिः अयं पदाध्वा । सद्योजातादिहृदयमन्त्रौ द्वौ मन्त्राध्वा। गन्धादिशब्दान्ताः गन्धरसरूपस्पर्शशब्दगुणाः । ब्रह्मा च कारणेश्वरः । ननु प्रतिष्ठायामबादिचतुर्विंशतितत्त्वानि[१६१] शोधनीयानीत्यनुपदमेवोच्यते । अतः किं निवृत्तौ गन्धादिशब्दान्तानां संक्षेप उच्यते । तत्र गन्धादीनां तत्त्वेन संक्षेपः अत्र गुणत्वेनेति न विरोधः । ननु अत्र च गन्धादिगुणानां ब्रह्मणः कारणेश्वरस्य च संक्षेपो न युज्यते तेषामध्वत्वाभावात्, अध्वशुद्धिः खल्वियं दीक्षेति चेत् , सत्यम्। पृथिवीतत्त्वशोधने तत्सम्बन्धिनामपि शोध्यत्वादस्तु। तथापि गन्धादीनां शोध्यत्वादन्तर्भावः कारणेश्वरस्य कथं शोध्यत्वमिति संक्षेपश्चेति चेत्, अत्र ब्रह्मणः संक्षेपः शिवपदगन्तुरात्मनो निष्प्रतिबन्धमानुकूल्यानुग्रहार्थमेव न तु शोधनाय पृथिवीतत्त्वाधिकारित्वात्तस्य

अथ प्रतिष्ठाकलायां संक्षेपप्रकारमाह–

---

[१५७] हृदयं द्वौ] T, R ; हृदयद्वौ C1, C3

[१५८] शोधनार्थमन्तर्भाव्यम्] C3; शोधनमन्तर्भाव्यम् C1

[१५९] क्षकारः] सम्पादकीयम्; क्षकारकः C1; क्षकरः C3

[१६०] अष्टोत्तरं शतम्] C3; अष्टोत्तरशतम् C1

[१६१] प्रतिष्ठायामबादि° C3; प्रतिष्ठायामम्ब्वादि° C1;

प्रतिष्ठायामबादीनि त्रयोर्विंशतिसंख्यया[१६२] ।
प्रकृत्यन्तानि तत्त्वानि ज्ञातव्यानि स्वभावतः[१६३] ॥ ४४ ॥
त्रयोविंशतिवर्णाश्च टादिहान्ता[१६४] विलोमतः ।
ज्ञातव्यान्यमरेशादिषट्पञ्चाशत् पुराणि च ॥ ४५ ॥
महेश्वराद्यरूप्यन्ता[१६५] पदानामेकविंशतिः ।
शिरो वामश्च मन्त्रौ द्वौ चत्वारस्तु गुणाः स्मृताः[१६६] ॥ ४६ ॥
रसादिशब्दपर्यन्ता विष्णुरत्र च कारणम् ।

निगद एव व्याख्यानम् ।
अथ विद्याकलायां संक्षेपप्रकारमाह–

विद्यायां सप्त तत्त्वानि पुरुषादीन्यनुक्रमात् ॥ ४७ ॥
वामादिभुवनानां च विज्ञेया सप्तविंशतिः ।
ध्यानाहरायपर्यन्ता[१६७] व्यापिन्निति पदादितः ॥ ४८ ॥
पदानां विंशतिर्मन्त्रौ शिखाघोरौ व्यवस्थितौ ।
ञकारादिधकारान्ता[१६८] वर्णाः सप्त विलोमतः ॥ ४९ ॥
रूपं स्पर्शश्च[१६९] शब्दश्च गुणा रुद्रस्तु कारणम् ।

इदमपि निगदव्याख्यानम् ।
अथ शान्तिकलायां संक्षेपप्रकारमाह–

---

[१६२] त्रयोविंशतिसंख्यया] M1, R, T, तत्त्वप्रकाशपञ्चमश्लोकव्याख्याने श्रीकुमारेण उद्धृतेषु ईशानशिवगुरुदेवपद्धतिश्लोकेषु च (S); चतुर्विंशतिसंख्यया C ;

[१६३] स्वभावतः] C, R, T ; स्वगर्भतः M1

[१६४] हादिटान्ता T,, R M1, S; टादिहान्ता C

[१६५] महेश्वराद्यरूप्यन्ता] M1; महेश्वराद्यरूपान्ता C1, C3; महेश्वरादरूप्यन्ता R

[१६६] स्मृताः] C ; मताः T, M1, R

[१६७] ध्यानाहरायपर्यन्ता] C ; ध्यानाहाराय° M1, R, T

[१६८] ञकारादिधकारान्ता] M1, R, T ; ङकारादिघकारान्ता C1

[१६९] रूपं स्पर्शश्च] C1, C3, M1; रूपस्पर्शौ च R, T

शान्तौ तु त्रीणि तत्त्वानि विद्येश्वरसदाशिवाः ॥ ५० ॥
गकखाश्च[१७०] त्रयो वर्णा मन्त्रौ वक्त्रतनुच्छदौ ।
वामामुख्यपुराण्यष्टादशैव परिसंख्यया ॥ ५१ ॥
नित्यं योगिन इत्यादीन्येकादश पदानि च ।
व्योमव्यापिन इत्यन्तान्युक्तानीह विलोमतः ॥ ५२ ॥
गुणौ स्पर्शश्च शब्दश्च[१७१] द्वावीशस्तत्र[१७२] कारणम् ।

इदमपि निगदव्याख्यानम्[१७३] ।

अथ शान्त्यतीतकलायां संक्षेपप्रकारमाह–

शान्त्यतीतकलायां तु शिवतत्त्वं[१७४] व्यवस्थितम् ॥ ५३ ॥
निवृत्त्यादिपुराण्यत्र भवन्ति दश पञ्च च ।
ओमित्येकं[१७५] पदं मन्त्रास्त्रेशानादिशिवास्त्रयः[१७६] ॥ ५४ ॥
विसर्गाद्या अकारान्ता[१७७] वर्णाः षोडश कीर्तिताः ।
भवत्येको गुणः शब्दः कारणं तु सदाशिवः ॥ ५५ ॥

इदमपि निगदव्याख्यानमेव । एतेषां वक्ष्यमाणोद्देशक्रमेणैव[१७८] व्याख्यानसम्भवात् । एवमध्वनां संक्षेपप्रकारमुक्त्वा शक्तिशिवतत्त्वे विभावनीयेत्याह–

---

[१७०] गखकाश्च] C3, M1; गकखाश्च C1; गकाराच्च R, T

[१७१] स्पर्शश्च शब्दश्च] C3, R, T ; स्पर्शशब्दश्च C1

[१७२] द्वावीशस्तत्र] C1; द्वावीश्वरस्तु C3, T; द्वावीश्वरस्तत्र R

[१७३] इदमपि निगदव्याखानम्] C1; इदं निगदव्याख्यानमेव C3

[१७४] शिवतत्त्वं] C, R, T ; तत्त्वद्वयं M1

[१७५] ओमित्येकं पदं] C ; ओमित्येकाक्षरं R, T

[१७६] मन्त्राश्चास्त्रेशानशिवास्त्रयः] T, R ; मन्त्रास्त्रेशानादिशिवास्त्रयः C1, C3

[१७७] विसर्गाद्या अकारान्ता] C3, T, R; विसर्गादिअकारान्ता C1

[१७८] वक्ष्यमाणोद्देशक्रमेणैव] C3; वक्ष्यमाणक्रमोद्देशक्रमेणैव C1

इत्यध्वानं[१७९] विचिन्त्याथ षडध्वव्यापिनीं पराम् ।
ध्यात्वा शक्तिं तदूर्ध्वं तु[१८०] भावयेत् परमं पदम् ॥ ५६ ॥

इति पूर्वोक्तसंक्षेपप्रकारेणाध्वानं षडध्वनोऽपि विचिन्त्य विभाव्य जातावेकवचनम् । अथानन्तरं षडध्वव्यापिनीं षडध्वव्यापकत्वेन परां शक्तिं ध्यात्वा तदूर्ध्वं पराशक्तेरूर्ध्वं परमं पदं लयापरपर्यायं शिवतत्त्वाख्यं पदं[१८१] तत्रैवमुक्तानामवस्थितेः भावयेत् शिष्यसंयोजनार्थमिति शेषः । शिवतत्त्वादधस्तनसर्वतत्त्वानां सम्यक्भावनाभावे शिवतत्त्वं दुर्विभाव्यमेवेति शब्दार्थः। भावना च सम्यक्परिज्ञानपूर्विका अज्ञातस्य दुर्विभाव्यत्वात्[१८२]। अत इदमेव सर्वदीक्षाबीजानां परमम् ।
एवमध्वसंक्षेपप्रकारमुक्त्वा अध्वस्वरूपापरिज्ञाने तत्संक्षेपप्रकार एव दुर्घट इति दीक्षोपयुक्ताध्वानस्तद्भेदाश्च इयन्त एवेति कथयितुं प्रतिजानीते–

अथ दीक्षोपयुक्तानां क्रमेणैव षडध्वनाम् ।
इयत्तया समुद्देशः कथ्यतेऽत्र विभागशः[१८३] ॥ ५७ ॥

विभागशः कथ्यते विभज्य उच्यते इत्यर्थः । तत्र मन्त्राध्वविभागमाह–

सद्यो वामस्तथाघोरपुरुषेशाश्च[१८४] हृच्छिरः ।
शिखावर्मास्त्रमूले[१८५] च मन्त्राध्वा समुदीरितः[१८६] ॥ ५८ ॥

सद्योजातवामदेवाघोरतत्पुरुषेशाना हृदयशिरःशिखाकवचनेत्रास्त्रमन्त्राश्च

---

[१७९] इत्यध्वानं] C3, R; इत्यध्वनां C1

[१८०] तदूर्ध्वं तु] C ; तदूर्ध्वं च R, T; तदूर्ध्वे तु M1, T1

[१८१] शिवतत्त्वाख्यं पदं] C3; शिवतत्त्वाख्यपदं C1

[१८२] अज्ञातस्य दुर्विभाव्यत्वात्] C3; अज्ञानदुर्विभाव्यत्वात् C1

[१८३] विभागशः] C, R, T ; विभागतः M1

[१८४] पुरुषेशाश्च हृच्छिरः] C ; पुरुषेशानहृच्छिरः M1, R, T, T1, T2

[१८५] शिखावर्मास्त्रमूले] C1, C3; शिखावर्मास्त्रमूलं R ;

[१८६] समुदीरितः] C1, C3, T; समुदाहृतः M1, T, R

मूलमन्त्रेण सह द्वादशापि मन्त्राध्वेति परिकीर्तितः ।
एतेषामुद्धारक्रमस्तु कारणे यथा–
षोडशस्वरसङ्घे तु नपुंसकविवर्जिते ।
द्वादशस्वरसङ्घेन नादाख्यार्णसमन्वितम् ।
व्योमाग्निभूतवर्णाश्च सप्तमं नवमं तथा ।
बिन्दुनादसमायुक्तं ब्रह्मपञ्चकमुच्यते ।
सद्यं वाममघोरं च पुरुषेशानकौ द्विजाः ।
ब्रह्माद्यनुक्रमेणैव नमस्कारान्तकानि तु ।
द्वितीयेन चतुर्थेन षष्ठेनैवाष्टमेन च ।
दशद्वादशवर्णाभ्यां षडङ्गानि विधीयन्ते ।
हृदयं च शिरश्चैव शिखाकवचमेव च ।
नेत्रमस्त्रं षडङ्गानि कीर्तितानि क्रमेण तु ।
हृदादिनेत्रपर्यन्ता बिन्दुयुक्ताः प्रकीर्तिताः ।
अस्त्रं विसर्गपर्यन्तं जातिषट्कसमन्वितम् ।
नमःस्वाहावषड्वौषट्हुंफट्कारक्रमेण तु ।
एते वै जातिषट्कं स्याद्धृदाद्यस्त्रान्तयोजिताः ।
प्रणवं चादितः कृत्वा वर्णोच्चारमनन्तरम् ।
अभिधानचतुर्थ्यन्तं नमस्कारादिसंयुतम् ।
ब्रह्माङ्गानामथोच्चारं सर्वकार्येषु पूजितम् ।
तथा क्रियाकरणमण्डने–
अक्लीबव्योमवर्गे तु रन्ध्रषीषु गुणेन्दवः ।
ईशपुंघोरवामाजबीजानि ह्रस्वमुच्चरेत् ।
तत्रैव वर्गे दृग्वेदरसेभाः पङ्क्तिभावनाः ।
हृदयाद्यङ्गबीजानि ख्याता वर्णा इमे क्रमात् ।
सान्तं षष्ठं सजम्भारि बिन्दुनादसमन्वितम् ।
सम्प्रदानशिवो मन्त्रो हृन्मुखेनाभियोजितः । इति ।
तथा सर्वज्ञानोत्तरे च मूलमन्त्रोद्धारो यथा–
हृद्बीजात् पञ्चमे बीजे षष्ठं बीजानि योजयेत् ।

मात्रात्रयसमायुक्तं मूर्ध्नि बिन्दुं प्रदापयेत् ।
शिवमेवंविधं विद्यात् सर्ववर्णेष्वनुक्रमात् । इति ।
विनियोगभेदश्च तत्रैव–
ह्रस्वदीर्घप्लुतानन्तान् यथाकामं प्रकल्पयेत् ।
अत्र ह्रस्वशब्देन ब्रह्माण्युच्यते । दीर्घशब्देनाङ्गानि प्लुतशब्देन मूलमन्त्रः। अनन्तशब्देन समनान्तः स एवेति व्याख्यातमघोरशिवाचार्यैः ।
ह्रस्वो दहति पापानि दीर्घस्तूच्चाटने ध्रुवम्[१८७] ।
आप्यायने प्लुतं युज्यादनन्तं मुक्तिकर्मणि । इति विनियोगभेदा अप्युक्ताः। तत्रैव–
नमस्कारान्तसंयुक्तानर्चने संप्रयोजयेत् ।
होमे स्वाहान्तसंयुक्तान् शान्तिकाकर्षपौष्टिके ।
वश्ये च सम्प्रयोक्तव्याः स्वाहाकारान्तसंयुताः । इति ।
ननु ह्रस्वैर्ब्रह्माणि कल्प्यानि दीर्घैरङ्गानीति बह्वागमवचनात् ब्रह्मणां ह्रस्वा एव वक्तव्याः । तथा च सन्ध्यक्षराणां ह्रस्वा न सन्तीति न्यायेन कथमोकारएकारयोरीशानतत्पुरुषबीजत्वमुच्यते ? एकारओकारयोरपि क्वचिद्ध्रस्वत्वं प्रतिपादितम् । यदाहुः शिक्षाकाराः–
छन्दोगानां[१८८] सातमुग्रिरायनिया ह्रस्वमेकारं ह्रस्वमोकारं च पठन्ति। इति । ननु मन्त्राध्वेति कथं ब्रह्माङ्गमूलमन्त्रा एवोच्यन्ते । सप्तकोटिमहामन्त्राणां दीक्षायां शोधयितुमशक्यत्वात्तेषां सर्वेषामप्यत्रैवान्तर्भावादेव तेषामेव शोध्यत्वेनोपयोगाच्च एतेषामेव मन्त्राध्वत्वमुक्तमित्यविरोधः ।
एवं मन्त्राध्वानमुक्त्वा पदाध्वस्वरूपमाह–

एकाशीतिपदैरेवं पदाध्वा परिकीर्तितः ।

एतेषामेकाशीतिपदानां तद्वर्णानां च इयत्तया परिच्छेदस्तत्तद्देवताश्च सिद्धान्तशेखरे प्रतिपादिताः । तद्यथा–

---

[१८७] दीर्घस्तूच्चाटने] C3; दीर्घः सूच्चाटयेत् C1

[१८८] छन्दोगानां] C3; छन्दोङ्गानां C1

ओमित्येकाक्षरं तत्र पदं तत्स्याच्छिवात्मकम् ।
पञ्चवर्णद्वितीयं वै स्याद्व्योमव्यापिने पदम् ।
तृतीयं व्योमरूपाय पञ्चवर्णं पदं भवेत् ।
पञ्चवर्णं चतुर्थं तु स्यात् सर्वव्यापिने पदम् ।
त्रयक्षरं शिवायेति पञ्चाङ्गानां पदानि च ।
अनन्तायेत्यनन्तस्य वाचकं चतुरक्षरम् ।
अनाथायेति सूक्ष्मस्य पदं स्याच्चतुरक्षरम् ।
अनाश्रिताय पञ्चार्णं स्याच्छिवोत्तमवाचकम् ।
त्र्यक्षरं च ध्रुवायेति ह्येकनेत्रस्य वाचकम् ।
शाश्वताय चतुर्वर्णमेकरुद्रस्य वाचकम् ।
अष्टाक्षरं योगपीठसंस्थिताय त्रिमूर्तिनः ।
श्रीकण्ठस्य पदं नित्यं योगिने पञ्चवर्णकम्।
ध्यानाहाराय पञ्चार्णं वाचकं तच्छिखण्डिनः ।
ओं नमःशिवाय पदं गायत्र्याश्च षडक्षरम् ।
पञ्चाक्षरं च सावित्र्याः स्यात् सर्वप्रभवेपदम् ।
त्र्यक्षरं च शिवायेति विद्येशानां च पूजने ।
पदमीशानमूर्धाय चेशानस्य षडक्षरम् ।
स्यात्तत्पुरुषवक्त्राय सप्तार्णं पुरुषस्य तु ।
अघोरहृदयायेति सप्तार्णं बहुरूपिणः ।
स्याद्वामदेवगुह्याय सप्तार्णं वामदेवके ।
सद्योजातस्य सप्तार्णं स्यात् सद्योजातमूर्तये ।
स्यादों नमो नमस्तु स्यात् पञ्चार्णां चण्डवाचकम् ।
ज्योतिरूपाय पञ्चार्णं पदं स्यादस्त्रवाचकम् ।
गुह्यादिगुह्यायपदं षड्वर्णं हृदयं ततः ।
गोप्त्रे च वर्णद्वयं तत्स्याच्छिरसो वाचकं मतम् ।
चतुर्वर्णं शिखाया स्यान्निधनायपदं मतम् ।
सर्वविद्याधिपायेति कवचं सप्तवर्णकम् ।
ज्योतिरूपायपञ्चार्णं पदं स्यादस्त्रवाचकम् ।

नेत्रमष्टा[क्ष]रं प्रोक्तं परमेश्वरपूर्वकम् ।
पराय चण्डनाथस्य षडङ्गान्युदितानि तु ।
अचेतनाचेतनेति सप्तार्णं तस्य चासनम् ।
व्योमव्योमपदं ज्ञेयं धर्मस्य चतुरक्षरम् ।
व्यापिन्व्यापिञ्चतुर्वर्णं पदं तद्ज्ञानवाचकम् ।
अरूपिन्नरूपिन्वैराग्ये तु षडक्षरम् ।
प्रथमप्रथमेत्येतदैश्वर्ये तु षडक्षरम् ।
तेजस्तेजश्चतुर्वर्णं कर्णिकावाचकं पदम् ।
ज्योतिर्ज्योतिश्चतुर्वर्णमनन्तस्य प्दं मतम् ।
केसराणामधश्चोर्ध्वं द्वात्रिंशच्च पदं मतम् ।
अरूपानग्न्यधूमेति स्यादभस्मपदं ततः ।
अनादे चाधनानानाधूधूधू च पदं तथा ।
सप्तैतानि पदानि स्युस्त्र्यक्षराणि शिवागमे ।
ओंभूश्च द्व्यक्षरं मन्त्रमोंभुवश्च त्रिवर्णकम् ।
ओंस्वोवर्णद्वयं च निधनेति चतुरक्षरम् ।
निधनं त्र्यक्षरम् ज्ञेयं पञ्चार्णं निधनोद्भव ।
शिवेति द्व्यक्षरं सर्वपदं च द्व्यक्षरं मतम् ।
परमात्मं चतुर्वर्णं चतुर्वर्णं महेश्वर ।
महादेवश्चतुर्वर्णं सद्भावेश्वरवाचकम् ।
महातेजश्चतुर्वर्णं योगाधिपतयेपदम् ।
पञ्चार्णं मुञ्चमुञ्चेति चतुर्वर्णं पदं मतम् ।
प्रथमप्रथमेत्येवं षड्वर्णं पदमीरितम् ।
शर्वशर्वचतुर्वर्णं तथा भवभवेति च ।
भवोद्भवचतुर्वर्णं सर्वभूतसुखप्रद ।
अष्टार्णं सर्वसान्निध्यकरस्यात् सप्तवर्णकम् ।
ब्रह्माविष्णुरुद्रपरानर्च्चतानर्च्चतेति च ।
असंस्तुतासंस्तुतेति पूर्वस्थितपूर्वस्थित ।
अष्टाक्षराणि चत्वारि पदानि च शिवागमे ।

द्वात्रिंशत् केसराणां स्युः पदान्यपि यथागमम् ।
साक्षिंसाक्षिंश्चतुर्वर्णं पदं स्यात् पत्रवाचकम् ।
इन्द्रादीनां पदान्यष्टौ वक्ष्यन्ते क्रमशो यथा ।
चतुर्वर्णं तुरुतुरुषट् पतङ्गपतङ्ग वै ।
पिङ्गपिङ्ग चतुर्वर्णं ज्ञानज्ञान तथा मतम् ।
शब्दशब्द चतुर्वर्णं सूक्ष्मसूक्ष्म तथा पदम् ।
शिवेति द्व्यक्षरं सर्वपदं चाष्टौ दिशाभृताम् ।
त्र्यक्षरं सर्वपदं सर्वविद्याधिपे मतम् ।
ओंनमोनमः पञ्चार्णं पदं ब्रह्मशिरो मतम् ।
ओं शिवाय चतुर्वर्णं रुद्राण्या वाचकं पदम् ।
नमोनमश्चतुर्वर्णं पदम् पाशुपते मतम् ।
ओमित्येकाक्षरं चिन्त्यं वज्रादीनां च वाचकम् ।
अष्टषष्ट्याधिकं प्रोक्तं वर्णानां च शतत्रयम् ।
एकाशीति पदान्येवं पदाध्वा परिकीर्तितः । इति ।
तथा च षट्सहस्रिकालोत्तरे शिवतनुवर्णनपटले-
पदानि व्याख्यानपूर्वकं प्रतिपाद्य शिवसद्भावपटले
आदावेव तदनुवादोऽक्षरसंख्या च प्रतिपादिता ।
तद्यथा-
अथ संख्या शिवस्योक्ता अक्षराणां शतत्रयम् ।
अष्टषष्ट्यधिकं शम्भोर्गुह्यमन्त्रविनिर्गतम् ।
मन्त्रार्थाश्च पुरा प्रोक्ता विद्येशानेन सम्भवेत् । इति ।
अथ वर्णाध्वानमाह-

अकारादिक्षकारान्तो वर्णाध्वा परिकीर्तितः[१८९] ॥ ५९ ॥

इदं निगदव्याख्यानमेव।

• अत्र M1 मातृकायां सम्पूर्णव्योमव्यापिमन्त्रः समुल्लिखितः ।

[१८९] परिकीर्तितः] C1; परिकीर्तिता: C3; समुदाहृतः T, M1, R

अथ भुवनाध्वनस्तत्त्वेष्वन्तर्भाववर्णनद्वारैव कलास्वपीयत्तावच्छेदेनैव संक्षेपमाह[१९०] –

कालाग्निरथ कूश्माण्डं हाटकं ब्राह्मवैष्णवम् ।
रौद्रं[१९१] च भुवनान्यन्तर्ब्रह्माण्डस्य स्थितानि षट् ॥ ६० ॥
कपालीशस्त्वजो बुद्धो वज्रदेहः प्रमर्दनः ।
विभूतिरव्ययः शास्ता पिनाकी त्रिदशाधिपः ॥ ६१ ॥
अग्निरुद्रो हुताशश्च पिङ्गलः खादको हरः ।
ज्वलनो दहनो बभ्रुर्भस्मान्तकक्षयान्तकौ[१९२] ॥ ६२ ॥
याम्यो मृत्युर्हरो धाता विधाता च तथा परः ।
कर्ता योक्ता वियोक्ता च धर्मो धर्मपतिस्तथा ॥ ६३ ॥
निऋतिर्मारणो हन्ता क्रूरदृष्टिर्भयानकः ।
ऊर्ध्वरेतो[१९३] विरूपाक्षो धूम्रलोहितदं ्णिः ॥ ६४ ॥
बलश्चातिबलश्चैव पाशहस्तो महाबलः ।
श्वेतोऽथ जयभद्रश्च दीर्घहस्तो[१९४] जलान्तकः ॥ ६५ ॥
मेघनादः सुनादश्च दशमः परिकीर्तितः ।
शीघ्रो लघुर्वायुवेगः सूक्ष्मस्तीक्ष्णः क्षयान्तकः ॥ ६६ ॥
पञ्चान्तकः पञ्चशिखः कपर्दी मेघवाहनः[१९५] ।

---

[१९०] उपाद्घातोक्तवत् वरुणपद्धतेः सम्पूर्णदीक्षाभागश्लोकाः मुद्रितरौरवागमतृतीयभागस्य सप्तचत्वारिंशत्तमपटलरूपतया वर्तमानत्वात् अत्रत्यभुवनाध्वविषयकश्लोकाः मुद्रितग्रन्थसाहाय्येन प्रायेण समीकृताः । अस्मिन् भुवनाध्वनि वर्णितानां भुवननामानि अचिन्त्यविश्वसादाख्यागमस्य षडध्वनिर्णयपटलेऽपि प्रायेण एवंरीत्यैव उपलभ्यन्ते ।

[१९१] रौद्रं] C, M1, R; ऊर्ध्वं T

[१९२] भस्मान्तकक्षयान्तकौ] C, R; भस्मान्तकः क्षयान्तकः M1, T

[१९३] ऊर्ध्वरेतो] C1; ऊर्ध्वशेफो C3, T, R; ऊर्ध्वकेशो इति तत्त्वप्रकाश–पञ्चमश्लोकव्याख्याने श्रीकुमारेण उद्धृतेषु ईशानशिवगुरुदेवपद्धतिश्लोकेषु (S)।

[१९४] दीर्घहस्तो] C1, C3, द; दीर्घबाहुः T, R

[१९५] मेघवाहनः] C, M1, R; मेघनादनः T

निधीशो रूपवान् धन्यः सौम्यदेहो जटाधरः ॥ ६७ ॥
लक्ष्मीधृग्रत्नधृक् श्रीधृक् प्रसादश्च प्रकामदः ।
विद्याधिपेशौ सर्वज्ञो ज्ञानभुग्वेदपारगः[१९६] ॥ ६८ ॥
सुरेशशर्वज्येष्ठाश्च[१९७] भूतपालो बलिप्रियः[१९८] ।
वृषो वृषधरोऽनन्तः क्रोधनो मारुताशनः ॥ ६९ ॥
ग्रसनोदुम्बरेशौ च फणीन्द्रो वज्रदं͡ष्ट्रिणौ ।
शम्भुर्विभुर्गणाध्यक्षस्त्र्यक्षश्च त्रिदशेश्वरः ॥ ७० ॥
संवाहश्च विवाहश्च नभोलिप्सुस्त्रिलोचनः ।
वीरभद्रो भद्रकाली सर्वोर्ध्वे भुवनद्वयम् ॥ ७१ ॥

एतेषां श्लोकानामुद्देशरूपत्वादेव पदच्छेदमात्रेणैवार्थनिर्वाहः सुकरः । अथैतेषामुद्दिष्टानामादौ षड्ब्रह्माण्डमध्यत इत्युक्तम् । अन्ये तु प्रागादिप्रतिदिशं दश दश ब्रह्माण्डोर्ध्वं च भुवनद्वयमिति । तेषामादिग्रहणेन विभागं करोति–

कपालीशादयः प्राच्यामग्निरुद्रादयोऽनले ।
याम्याद्या दक्षिणे भागे निरृत्याद्यास्तु नैरृते ॥ ७२ ॥
बलाद्या वारुणे भागे शीघ्राद्या वायुगोचरे ।
उत्तरे तु निधीशाद्या ईशे विद्याधिपादयः ॥ ७३ ॥
वृषादयस्त्वधोभागे शम्भुमुख्यास्तदूर्ध्वतः[१९९] ।
ब्रह्माण्डस्य बहिर्देशे दशदिक्षु व्यवस्थिताः ॥ ७४ ॥

अथैवं निवृत्तिकलायाः कालाग्निप्रभृतिभुवनानामष्टोत्तरशतमित्युपसंहरति–

एवं कालाग्निमुख्यानां पुराणां परिसंख्यया ।
निवृत्त्यादिकलायां तु ज्ञेयमष्टोत्तरं शतम् ॥ ७५ ॥

---

[१९६] ज्ञानभुग्वेदपारगः] C3, R, S; ज्ञानधृग्वेदपारगः C1; °भूर्वेद° T

[१९७] सुरेशशर्वज्येष्ठाश्च] C1, C3, द ; सुरेशः शर्वः ज्येष्ठश्च T, R

[१९८] भूतपालो बलिप्रियः] C1, C3, R; भूतबालो बलप्रियः T, M1

[१९९] शम्भुमुख्यास्तदूर्ध्वतः] C1, C3, R, T; शम्भुमुख्या नभोगताः M1

एवं निवृत्तितत्त्वस्थितभुवनान्यभिधाय[२००] प्रतिष्ठास्थिताप्तत्त्वादिवर्ति-भुवनान्याह-

अमरेशः प्रभासश्च नैमिशः पुष्करौषधी ।
डिण्डिमुण्डिस्तथाभारभूतिश्च लकुलीश्वरः ॥ ७६ ॥
हरिश्चन्द्रोऽथ श्रीशैलो जल्पेशाम्रातकेश्वरौ ।
मध्यमेशो महाकालः केदारो भैरवस्तथा ॥ ७७ ॥
गया चैव कुरुक्षेत्रं नाखलो नखलस्तथा[२०१] ।
विमलेशोऽट्टहासश्च महेन्द्रो भीमकेश्वरः ॥ ७८ ॥
वस्त्रापदो[२०२] रुद्रकोटिरविमुक्तो महाबलः[२०३] ।
गोकर्णो भद्रकर्णश्च स्वर्णाक्षः स्थाणुरित्यपि ॥ ७९ ॥
छगलण्डो द्विरण्डश्च माकोटो मण्डलेश्वरः ।
कालाञ्जरः शङ्कुकर्णः स्थूलेश्वरस्थलेश्वरौ ॥ ८० ॥
पैशाचं राक्षसं याक्षं गान्धर्वं चैन्द्रमेव च ।
सौम्यं चैव तथा ज्ञेयं प्राज्ञेशं ब्राह्ममष्टमम्[२०४] ॥ ८१ ॥
अकृतं च कृतं चैव भैरवं ब्राह्मवैष्णवम्[२०५] ।
कौमारं च तथा चौमं श्रीकण्ठं चाष्टमं तथा ॥ ८२ ॥

एवमुद्दिष्टानामेव प्रतिष्ठाकलावर्तिभुवनानां तत्र स्थितभेदेन प्रतितत्त्वमष्टा-ष्टसंख्यया तत्त्वसप्तके षट्पञ्चाशदिति विभागं करोति-

अमरेशादि चाप्तत्त्वे हरिश्चन्द्रादितेजसि ।

---

२०० निवृत्तितत्त्वस्थित°] C1; निवृत्तिकलावर्तितत्त्वस्थित° C3;

२०१ नाखलो नखलस्तथा] C1, C3, R, T; नोखलं कनखलं तथा द

२०२ वस्त्रापदो] C1, C3, M1; वस्त्रापथो T ; वस्त्रापदं R

२०३ महाबलः] C1, C3; महालयः M1, R, द

२०४ चैव तथा ज्ञेयं प्राज्ञेशं ब्राह्ममष्टमम्] C1, C3, R, T; प्राजेश्वरं ब्राह्ममष्टमं परिकीर्तितम् M 1

२०५ ब्राह्मवैष्णवम्] C1, C3; ब्राह्मवैष्णवे द ; ब्राह्मवैष्णवौ R

गयादिवायुतत्त्वे च व्योम्नि वस्त्रापदादि च ॥ ८३ ॥
छगलण्डाद्यहंकारे पैशाचाद्यं मतौ स्थितम् ।
प्रकृतावकृताद्येवं षट्पञ्चाशत् पुराणि तु ॥ ८४ ॥
ज्ञातव्यानि प्रतिष्ठायाममरेशादिनामभिः ।

तत्रचामरेशादयस्त्वादिगुह्याष्टकातिगुह्याष्टकगुह्यात्गुह्याष्टकपवित्राष्टकस्थाण्वष्टका-ख्यया ख्याताः । परमेश्वराज्ञया लोकानुग्रहाय भूलोकवासिनो लिङ्गभूताश्च भवन्ति । तथा चोक्तं सर्वज्ञानोत्तरे-

आदिगुह्याष्टका रुद्रा अतिगुह्याष्टकास्तथा ।
गुह्यात्गुह्याष्टकाश्चैव पवित्राष्टकमेव च ।
स्थाण्वाकाश्च पञ्चैते नियोगात् भूमिवासिनः ।
अनुग्रहाय लोकानां लिङ्गभूताः प्रतिष्ठिताः ।
तेषामेव समीपस्थं यत्तोयं षडानन ।
तत्तीर्थं परमं पुण्यं तत्र स्नात्वा शिवं व्रजेत् ।
ये त्यजन्ति सदा प्राणान् स्थानेष्वेतेषु मानवाः ।
ब्रह्माण्डं ते विनिर्भिद्य यान्ति पञ्चाष्टकं पदम् ।

अयं च तीर्थस्नानशिवक्षेत्रवासादिजन्यस्त्वपरमोक्षः । परमोक्षस्तु दीक्षयैव। तद्व्यतिरेकेण परमोक्ष एव नास्तीति प्रागेव निरूपितम् ।

अथ विद्याकलावर्त्तिभुवनान्याह-

वामो भीमस्तथोग्रश्च भवेशानैकवीरकाः ॥ ८५ ॥
प्रचण्डोमापती चाजोऽनन्तैकशिव एव च ।
क्रोधश्चण्डेश्वरो ज्योतिः[२०६] संवर्तो लकुलीश्वरः ॥ ८६ ॥
पञ्चान्तकैकवीरौ च शिखोदश्च[२०७] महाद्युतिः ।
वामदेवोद्भवौ चैव भवश्चाप्येकपिङ्गलः ॥ ८७ ॥
एकेक्षणस्तथेशानस्तथैवाङ्गुष्ठमात्रकः ।

---

[२०६] क्रोधश्चण्डेश्वरो ज्योतिः] C1, C3, R, T; क्रोधश्चण्डोद्युतिश्चैव M1

[२०७] शिखोदश्च] C1, C3; शिखेदश्च T, R; शिवदश्च S

अथैतेषां तत्त्वभेदेन विभागं करोति–

वामादिपुरुषे रागे प्रचण्डादिकपञ्चकम् ॥ ८८ ॥
नियत्यादिषु क्रोधादि महाद्युत्यादि मायिके ।
वामादीनां पुराणां च विद्यायां सप्तविंशतिः ॥ ८९ ॥

अथ शान्तिकलाभुवनान्याह–

वामा ज्येष्ठा च रौद्री च काली कलविकरिणी[२०८] ।
बलविकरणी चैव बलप्रमथनी तथा[२०९] ॥ ९० ॥
सर्वभूतदमनी च मनोन्मनीत्यनन्तकः[२१०] ।
सूक्ष्मः शिवोत्तमश्चैकनेत्ररुद्रौ त्रिमूर्तिकः[२११] ॥ ९१ ॥
श्रीकण्ठश्च शिखण्डी च तथैवान्यः[२१२] सदाशिवः[२१३] ।
शान्तौ वामामुखान्यष्टादशैव भुवनानि तु ॥ ९२ ॥

अत्र शान्तिकलाभुवनमध्ये मनोन्मनीतिकारेण विद्यातत्त्वे मनोन्मन्यन्तं न च । ईश्वरतत्त्वेऽनन्ताद्यष्टकं सदाशिवतत्त्वे सदाशिव एव । अथ शान्त्यतीतभुवनान्याह–

निवृत्तिश्च प्रतिष्ठा च विद्याशान्तिस्तथैव च ।
शान्त्यतीतेन्धिका चैव दीपिका रोचिका तथा ॥ ९३ ॥

---

[२०८] कलविकरिणी C1, C3; कलविकरणी R; कलविकारिणी S, T

[२०९] बलविकरणी चैव बलप्रमथनी तथा] C1, C3, द; तथा बलविकरणी बलप्रमथिनीत्यपि R

[२१०] मनोन्मनीत्यनन्तकः] C1, C3, R; मनोन्मनीत्यनन्तकम् M1, T

[२११] शिवोत्तमश्चैकनेत्ररुद्रौ त्रिमूर्तिकः] C1, C3; शिवोत्तमश्चैकनेत्ररुद्रस्त्रिमूर्तयः M1, T ; शिवोत्तमश्चैकाक्षैकरुद्रत्रिमूर्तयः R

[२१२] तथैवान्यः सदाशिवः] C1, C3, M1, R; तथैशान्यसदाशिवौ T

[२१३] वामाद्यस्त्वथ विद्यायामनन्ताद्यस्तथेश्वरे इति M1 मातृकायां, वामादीनि च विद्येशः सदेशेषु स्थितानि च इति T मातृकायां, वामादीनीह विद्येशसदेशेष्वाश्रितानि च Cति R पुस्तके चाधिकं वर्तते ।

मोचिका चोर्ध्वगा चैव व्यापिनी व्योमरूपिणी ।
अनन्ता च तथानाथानाश्रिता च तथा परा ॥ ९४ ॥
निवृत्त्यादीन्यतीतायां[२१४] पुराणि दश पञ्च च ।

निवृत्त्यादीनां स्वरूपं मृगेन्द्रे यथा (१३: १६६पू–१७६पू)
करोत्युन्मीलनं याभिः शक्तिभिर्नरतेजसः ।
ता निवृत्त्यादिसंज्ञानां भुवनानामधीश्वराः ।
निवर्तयति भूतानि यया सास्य निवर्तिका ।
निवृत्तिरिति तत्स्थानं तत्रेशोपि निवृत्तिमान् ।
निवृत्तस्य गतिर्भूयो यया प्रच्यावलक्षणा ।
निरुध्यते प्रतिष्ठा सा स्थानं तद्वांश्च तत्पतिः ।
त्यक्त्वाप्तगम्यविषयं यया ज्ञानं ददात्यणोः ।
सा विद्या स्थानमप्यस्या विद्येशश्च तदीश्वरः ।
सर्वदुःखप्रशमनं ययास्य कुरुते हरः ।
सा शान्तिस्तत्पदं चेति तत्कुर्वन् सोऽपि शान्तिमान् ।
ऊर्ध्वाधोविषयालोको महान् यश्च महत्तरः ।
महत्तमश्च क्रियते चितो याभिर्विमुच्यतः ।
ता इन्धिकाद्यास्तत्स्थानं तद्वानीशस्तिसृष्वपि ।
सर्वज्ञत्वादियोगेऽपि नियोज्यत्वं मलांशतः ।
प्रमार्ष्टि तद्यया साऽस्य मोचिका तत्पदं च यत् ।
मोचकस्तत्क्रियाकृच्च ययेशानं करोति तम् ।
सोर्ध्वगा तत्पदं चेति तदीशश्चोर्ध्वगापतिः ।
येऽपि तत्पदमापन्नाः शैवसाधनयोगतः ।
ते तत्स्थित्यन्तमाह्लादं प्राप्य यान्ति परं पदम् ।
न च सृष्ट्यादि कुर्वन्ति स्वार्थनिष्ठा हि ते यतः । इति ।
अथोक्तभुवनाध्वनामुपसंहरति–

---

[२१४] निवृत्त्यादीन्यतीतायां] C1, C3, R; निवृत्तादीन्यतीतायां M1, T

एवं पञ्चकलावर्ति भुवनानां शतद्वयम् ॥ ९५ ॥
चतुर्विंशोत्तरं यत्तद्भुवनाध्वनि वर्णितम् ।

सुबोधम् । अत्र चतुर्विंशत्युत्तरं भुवनशतद्वयं वर्णितमित्यनेनान्यान्यापि दिव्यागमोक्तभुवनान्यत्रैवान्तर्भवन्ति दीक्षायामेतावच्छोधनेनैव तेषामपि शुद्धिः सम्भवति । एवं भुवनाध्वानमुक्त्वा तत्त्वाध्वानमाह–

अथ तत्त्वानि षट्त्रिंशत् पृथ्व्यप्तेजोमरुद्वियत् ॥ ९६ ॥
गन्धो रसो रूपस्पर्शशब्दोपस्थानि पायु च[२१५] ।
पादः पाणिश्च वाङ्नासाजिह्वाचक्षुस्त्वचः श्रुतिः[२१६] ॥ ९७ ॥
मनोऽहङ्कारबुद्धी च प्रकृतिः पुरुषस्तथा ।
रागो नियतिविद्ये च कला कालश्च मोहिनी ॥ ९८ ॥
विद्या चेश्वरसादाख्ये[२१७] शक्तिः शिव इति स्मृतः ।

इति निगदव्याख्यानम् ।
एतेषां पृथ्व्यादितत्त्वानां स्वरूपं मृगेन्द्रमतङ्गसर्वज्ञानोत्तराद्यागमैस्तत्त्वसंग्रहतत्त्वनिर्णयतत्त्वप्रकाशादिभिश्च विस्तरेण वर्णितमिति ग्रन्थविस्तारभयान्नैवेह[२१८] वर्णितम् ।
अथ कलाध्वानमाह–

निवृत्तिश्च प्रतिष्ठा च विद्याशान्तिस्तथापरा ॥ ९९ ॥
अतीतेति कलाः पञ्च[२१९]

---

[२१५] गन्धो रसो रूपस्पर्शशब्दोपस्थानि पायु च] C1; गन्धो रूपोरसस्पर्श° C3; गन्धो रूपं रसः स्पर्शः शब्दोपस्थौ च पायु च R

[२१६] पादः पाणिश्च वाङ्नासाजिह्वाचक्षुस्त्वचः श्रुतिः] C1, C3; पादौ पाणी च वाङ् नासा जिह्वाचक्षुस्त्वचः श्रुतिः M1, R

[२१७] चेश्वरसादाख्ये] C1, C3, R, T ; चेश्वरसादाख्यौ M1

[२१८] °भयान्नैवेह] C1; °भयान्नेह C3

[२१९] पञ्च] C1, C3; विद्धि M1, R, T

निगदव्याख्यानमेतत् ।
अथैतत्ग्रन्थेन प्रतिपादितदीक्षाबीजमुपसंहरति–

समुद्देशः षडध्वनाम् ॥ ९९१/२ ॥

इति वरुणपद्धत्यां दीक्षाविधिः सम्पूर्णः ॥

एवं षडध्वनां मन्त्रादीनामुद्देशो दीक्षाबीजपरिज्ञानार्थं कृत इति शेषः ।

इतिश्रीमद्व्याघ्रपुरनिवासि
निगमज्ञानदेवविरचित
वरुणपद्धतिव्याख्याने विलोचनाख्याने
दीक्षाप्रकरणं प्रथमम् ।

श्लोकार्धसूची

पू : पूर्वार्धम्   उ : उत्तरार्धम्

अकारादिक्षकारान्तो वर्णाध्वा परिकीर्तितः, ५९ उ
अकृतं च कृतं चैव भैरवं ब्राह्मवैष्णवम्, ८२ पू
अग्निरुद्रो हुताशश्च पिङ्गलः खादको हरः, ६२ पू
अतीतेति कलाः पञ्च समुद्देशः षडध्वनाम्, १०० पू
अथ तत्त्वानि षट्त्रिंशत् पृथ्व्यप्तेजोमरुद्वियत्, ९६ उ
अथ दीक्षोपयुक्तानां क्रमेणैव षडध्वनाम्, ५७ पू
अथ निर्बीजिका दीक्षा प्रोक्ता सा द्विप्रकारिका, २५ पू
अथ संगृह्यते बीजद्वयं दीक्षाप्रतिष्ठयोः, १ उ
अधर्ममात्रसंशुद्धौ द्वितीया लोकधर्मिणी, २९ उ
अनन्ता च तथानाथानाश्रिता च तथा परा, ९४ उ
अन्त्यात् पदान्महादेवपदावधि विलोमतः, ४२ पू
अमरेशः प्रभासश्च नैमिशः पुष्करौषधी, ७६ पू
अमरेशादि चाप्तत्त्वे हरिश्चन्द्रादितेजसि, ८३ पू
आचार्यमूर्तिमास्थाय चतुर्धा शक्तिपाततः, १३ पू
इज्यानलवती या तु क्रियाकौशलसम्भवा, २३ पू
इत्यध्वानं विचिन्त्याथ षडध्वव्यापिनीं पराम्, ५६ पू
इयत्तया समुद्देशः कथ्यतेऽत्र विभागशः, ५७ उ
उच्चरेत् संहितामन्त्रान् वाग्दीक्षेयं प्रवर्तताम्, १८ उ
उत्तरे तु निधीशाद्या ईशे विद्याधिपादयः, ७३ उ
ऊर्ध्वरेतो विरूपाक्षो धूम्रलोहितदंिणः, ६४ उ

एका निर्वाणदा सद्यो द्वितीया देहपाततः, २५ उ
एकाशीतिपदैरेवं पदाध्वा परिकीर्तितः, ५९ पू
एकेक्षणस्तथेशानस्तथैवाङ्गुष्ठमात्रकः, ८८ पू
एवं कालाग्निमुख्यानां पुराणां परिसंख्यया, ७५ पू
एवं पञ्चकलावर्ति भुवनानां शतद्वयम्, ९५ उ
कपालीशस्त्वजो बुद्धो वज्रदेहः प्रमर्दनः, ६१ पू
कपालीशादयः प्राच्यामग्निरुद्रादयोऽनले, ७२ पू
कर्ता योक्ता वियोक्ता च धर्मो धर्मपतिस्तथा, ६३ उ
कला हृत्कण्ठतालुभ्रूब्रह्मरन्ध्रावधि क्रमात्, ४० उ
कलाभिस्तानि तत्त्वानि व्याप्तानीह कलाः क्रमात्, ३९ पू
कालाग्निप्रभृतीनां तु पुरमष्टोत्तरं शतम्, ४१ उ
कालाग्निरथ कूश्माण्डं हाटकं ब्राह्मवैष्णवम्, ६० पू
कालाञ्जरः शङ्कुकर्णः स्थूलेश्वरस्थलेश्वरौ, ८० उ
किञ्चिज्ज्ञो मलिनो भिन्नः कर्ता भोक्ता स्वकर्मणाम्, ४ पू
क्रियया वाथ शक्त्या वा दीक्षा सा सर्वतो मता, ३५ उ
क्रिया सा कथ्यते दीक्षा भक्तिवैराग्यलक्षणा, २ उ
कौमारं च तथा चौमं श्रीकण्ठं चाष्टमं तथा, ८२ उ
क्रोधश्चण्डेश्वरो ज्योतिः संवर्तो लकुलीश्वरः, ८६ उ
गकखाश्च त्रयो वर्णा मन्त्रौ वक्त्रतनुच्छदौ, ५१ पू
गन्धो रसो रूपस्पर्शशब्दोपस्थानि पायु च, ९७ पू
गया चैव कुरुक्षेत्रं नाखलो नखलस्तथा, ७८ पू
गयादिवायुतत्त्वे च व्योम्नि वस्त्रापदादि च, ८३ उ
गुणा गन्धादिशब्दान्ताः पञ्च ब्रह्मा च कारणम्, ४३ उ
गुणौ स्पर्शश्च शब्दश्च द्वावीशस्तत्र कारणम्, ५३ पू

गोकर्णो भद्रकर्णश्च स्वर्णाक्षः स्थाणुरित्यपि, ७९ उ
ग्रसनोदुम्बरेशौ च फणीन्द्रो वज्रदंष्ट्रिणौ, ७० पू
चक्षुरुन्मील्य यत्तत्त्वं ध्यात्वा शिष्यः समीक्ष्यते, १६ पू
चतुर्विंशोत्तरं यत्तद्भुवनाध्वनि वर्णितम्, ९६ पू
चाक्षुषी स्पर्शदीक्षा च वाचिकी मानसी तथा, १५ पू
छगलण्डाद्यहंकारे पैशाचाद्यं मतौ स्थितम्, ८४ पू
ज्वलनो दहनो बभ्रुर्भस्मान्तकक्षयान्तकौ, ६२ उ
ञकारादिघकारान्ता वर्णाः सप्त विलोमतः, ४९ उ
डिण्डिमुण्डिस्तथाभारभूतिश्च लकुलीश्वरः, ७६ उ
ततः सुखादिकं कृत्स्नं भोगं भुङ्क्ते स्वकर्मतः, ८ पू
तत्त्वाध्वा च कलाध्वा च विशत्येकं पदं शिवम्, ३७ उ
तत्त्वे चित्तं समाधाय बृंहितान्तरतेजसा, १८ पू
तत्र निर्बीजिका या सा समयिन्यथ पुत्रके, २४ पू
तस्मात् ज्ञानं च भक्तिश्च वैराग्यमिति चात्मनः, ३ पू
त्रयोविंशतिवर्णाश्च टादिहान्ता विलोमतः, ४५ पू
त्रिधा सोऽयमनुग्राह्यः सकलः प्रलयाकलः, ९ पू
दीक्षया मुच्यते देही त्रिविधाद्भवबन्धनात्, ३६ पू
दीक्षा ज्ञानवती प्रोक्ता सम्यक् तत्त्वावबोधजा, २२ उ
दीक्षा निरधिकारैव नैमित्तानधिकारिणी, ३० उ
दीक्षितस्येह चिह्नानि पशोस्त्वेतानि नाञ्जसा, ३ उ
धर्माधर्मात्मकं कर्म एतैः पाशैर्युतः पशुः , ६ उ
धर्माधर्मात्मकं कर्म प्रागागामि विचित्रकम्, २८ उ
ध्यात्वा शक्तिं तदूर्ध्वं तु भावयेत् परमं पदम्, ५६ उ
ध्यानाहरायपर्यन्ता व्यापिन्निति पदादितः, ४८ उ

निॠतिर्मारणो हन्ता क्रूरदृष्टिर्भयानकः, ६४ पू
नित्यं योगिन इत्यादीन्येकादश पदानि च, ५२ पू
नित्यमात्राधिकारित्वात् समयिन्यपि पुत्रके, ३० पू
निधाय दक्षिणे हस्ते शिवं ब्रह्माङ्गसंयुतम्, १७ पू
निधीशो रूपवान् धन्यः सौम्यदेहो जटाधरः, ६७ उ
नियत्यादिषु क्रोधादि महाद्युत्यादि मायिके, ८९ पू
निर्वाणद्वयबीजाय नमः सोमाय शम्भवे, १ पू
निवृत्त्यादिकलायां तु ज्ञेयमष्टोत्तरं शतम्, ७५ उ
निवृत्त्यादिपुराण्यत्र भवन्ति दश पञ्च च, ५४ पू
निवृत्त्यादीन्यतीतायां पुराणि दश पञ्च च, ९५ पू
निवृत्तौ पार्थिवं तत्त्वं चिन्त्यमेकं क्षमक्षरम्, ४१ पू
निवृत्तिश्च प्रतिष्ठा च विद्याशान्तिश्च नाभसी, ४० पू
निवृत्तिश्च प्रतिष्ठा च विद्याशान्तिस्तथैव च, ९३ पू
निवृत्तिश्च प्रतिष्ठा च विद्याशान्तिस्तथापरा, ९९ उ
निर्वाणाख्या तु सा सैव पुत्रके नाभिषेकतः, ३३ उ
निराधारोऽथ साधारः शिवस्यानुग्रहो द्विधा, ११ उ
पञ्चान्तकः पञ्चशिखः कपर्दी मेघवाहनः, ६७ पू
पञ्चान्तकैकवीरौ च शिखोदश्च महाद्युतिः, ८७ पू
पदानां विंशतिर्मन्त्रौ शिखाघोरौ व्यवस्थितौ, ४९ पू
पशोरज्ञतया मायायोगो भोगाय कर्मणाम्, ७ पू
पादः पाणिश्च वाङ्नासाजिह्वाचक्षुस्त्वचः श्रुतिः, ९७ उ
पाशबन्धविमोक्षाय दीक्षेयं चाक्षुषी मता, १६ उ
पाशा अपि त्रयो ज्ञेया मलो माया च कर्म च, ५ पू
पैशाचं राक्षसं याक्षं गान्धर्वं चैन्द्रमेव च, ८१ पू

प्रकृतावकृताद्येवं षट्पञ्चाशत् पुराणि तु, ८४ उ
प्रकृत्यन्तानि तत्त्वानि ज्ञातव्यानि स्वभावतः, ४४ उ
प्रचण्डोमापती चाजोऽनन्तैकशिव एव च, ८६ पू
प्रतिष्ठायामबादीनि त्रयोविंशतिसंख्यया, ४४ पू
बलविकरणी चैव बलप्रमथनी तथा, ९० उ
बलश्चातिबलश्चैव पाशहस्तो महाबलः, ६५ पू
बलाद्या वारुणे भागे शीघ्राद्या वायुगोचरे, ७३ पू
बालबालिशवृद्धस्त्रीभोगभुग्व्याधितात्मनाम्, २६ पू
ब्रह्माण्डस्य बहिर्देशे दशदिक्षु व्यवस्थिताः, ७४ उ
भगवाननुगृह्णाति स एव सकलानपि, १३ उ
भवत्येको गुणः शब्दः कारणं तु सदाशिवः, ५५ उ
भवेन्निर्बीजिका दीक्षा समयाचारवर्जिता, २६ उ
मध्यमेशो महाकालः केदारो भैरवस्तथा, ७७ उ
मनोऽहङ्कारबुद्धी च प्रकृतिः पुरुषस्तथा, ९८ पू
मन्त्राः पदानि वर्णैश्च व्याप्तानि सकलं ततः, ३८ पू
मन्त्राध्वा च पदाध्वा च वर्णाध्वा भुवनाध्वकः, ३७ पू
मलकर्मावृतो यस्तु स भवेत् प्रलयाकलः, १० उ
मलं चाशुद्धिरज्ञानं तच्चैतन्यनिरोधकम्, ५ उ
मलैकबन्धसम्बद्धो विज्ञानाकल उच्यते, ११ पू
महेश्वराद्यरूप्यन्ता पदानामेकविंशतिः, ४६ पू
मानसं विधिमाश्रित्य मानसीत्यभिधीयते, १९ पू
मायाकर्ममलच्छन्नः सकलः सोऽभिधीयते, १० पू
माया कलादिपृथ्व्यन्ता यद्भवा तत्त्वसंहतिः, ६ पू
मेघनादः सुनादश्च दशमः परिकीर्तितः, ६६ पू

मोचिका चोर्ध्वगा चैव व्यापिनी व्योमरूपिणी, ९४ पू
यत्र पाशशिखाच्छेदो योगः शिवपदे भवेत्, ३३ पू
यत्र रुद्रपदे योगो योगो विद्येश्वरे पदे, ३२ पू
याम्याद्या दक्षिणे भागे निऋत्याद्यास्तु नैऋते, ७२ उ
याम्यो मृत्युर्हरो धाता विधाता च तथा परः, ६३ पू
योगेन योगदीक्षा स्याच्छिवत्वेऽस्य व्यवस्थिता, २० पू
रजःकुण्डवती हौत्री सा द्विभेदा किलोदिता, २० उ
रसादिशब्दपर्यन्ता विष्णुरत्र च कारणम्, ४७ पू
रागो नियतिविद्ये च कला कालश्च मोहिनी, ९८ उ
रूपं स्पर्शश्च शब्दश्च गुणा रुद्रस्तु कारणम्, ५० पू
रौद्रं च भुवनान्यन्तर्ब्रह्माण्डस्य स्थितानि षट्, ६० उ
लक्ष्मीधृग्रत्नधृक् श्रीधृक् प्रसादश्च प्रकामदः, ६८ पू
वर्णास्तु भुवनैर्व्याप्तास्तत्त्वैर्व्याप्तानि तानि च, ३८ उ
वस्त्रापदो रुद्रकोटिरविमुक्तो महाबलः, ७९ पू
वामा ज्येष्ठा च रौद्री च काली कलविकरिणी, ९० पू
वामादिपुरुषे रागे प्रचण्डादिकपञ्चकम्, ८८ उ
वामादिभुवनानां च विज्ञेया सप्तविंशतिः, ४८ पू
वामामुख्यपुराण्यष्टादशैव परिसंख्यया, ५१ उ
वामो भीमस्तथोग्रश्च भवेशानैकवीरकाः, ८५ उ
वामादीनां पुराणां च विद्यायां सप्तविंशतिः, ८९ उ
वामदेवोद्भवौ चैव भवश्चाप्येकपिङ्गलः, ८७ उ
विज्ञानाकल इत्येषां स्वरूपमधुनोच्यते, ९ उ
विदुषां च समर्थानां सबीजा परिकीर्तिता, २७ पू
विद्या चेश्वरसादाख्ये शक्तिः शिव इति स्मृतः, ९९ पू

विद्याधिपेशौ सर्वज्ञो ज्ञानभुग्वेदपारगः, ६८ उ
विद्यायां सप्त तत्त्वानि पुरुषादीन्यनुक्रमात्, ४७ उ
विनेज्यानलकर्मादि मनोव्यापारमात्रतः, २२ पू
विभूतिरव्ययः शास्ता पिनाकी त्रिदशाधिपः, ६१ उ
विमलेशोऽट्टहासश्च महेन्द्रो भीमकेश्वरः, ७८ उ
विसर्गाद्या अकारान्ता वर्णाः षोडश कीर्तिताः, ५५ पू
वीरभद्रो भद्रकाली सर्वोर्ध्वे भुवनद्वयम्, ७१ उ
वृषादयस्त्वधोभागे शम्भुमुख्यास्तदूर्ध्वतः, ७४ पू
वृषो वृषधरोऽनन्तः क्रोधनो मारुताशनः, ६९ उ
व्योमव्यापिन इत्यन्तान्युक्तानीह विलोमतः, ५२ उ
व्योमव्यापिपदान्यष्टाविंशतिः परिसंख्यया, ४२ उ
शम्भुर्विभुर्गणाध्यक्षस्त्र्यक्षश्च त्रिदशेश्वरः, ७० उ
शरीराढ्यो विभुर्नित्यः संस्कार्यः सेश्वरः पशुः, ४ उ
शान्तौ तु त्रीणि तत्त्वानि विद्येश्वरसदाशिवाः, ५० उ
शान्तौ वामामुखान्यष्टादशैव भुवनानि तु, ९२ उ
शान्त्यतीतकलायां तु शिवतत्त्वं व्यवस्थितम्, ५३ उ
शान्त्यतीतेन्धिका चैव दीपिका रोचिका तथा, ९३ उ
शास्त्रस्य सम्प्रदानेन शास्त्रदीक्षा समीरिता, १९ उ
शास्त्री च योगदीक्षा च हौत्रीत्यादिरनेकधा, १५ उ
शिखाच्छेदो न यत्रास्ति दीक्षा सा समयी द्विधा, ३२ उ
शिखावर्मास्त्रमूले च मन्त्राध्वा समुदीरितः, ५८ उ
शिरो वामश्च मन्त्रौ द्वौ चत्वारस्तु गुणाः स्मृताः, ४६ उ
शिवसंस्कारयुक्तस्य यच्छिवत्वसमर्पणम्, ३५ पू
शिवस्यानुग्रहाद्दीक्षा जायते कृतकर्मणाम्, १४ पू

शिवोऽनपेक्षिताचार्यो द्विधा शक्तिनिपातनात्, १२ पू
शीघ्रो लघुर्वायुवेगः सूक्ष्मस्तीक्ष्णः क्षयान्तकः, ६६ उ
शोधनीयान्विभाव्यैवं पञ्च पञ्चाध्वगर्भिताः, ३९ उ
श्रीकण्ठश्च शिखण्डी च तथैवान्यः सदाशिवः, ९२ पू
श्वेतोऽथ जयभद्रश्च दीर्घहस्तो जलान्तकः, ६५ उ
सद्योजातश्च हृदयं द्वौ मन्त्रौ परिकीर्तितौ, ४३ पू
सद्यो वामस्तथाघोरपुरुषेशाश्च हृच्छिरः, ५८ पू
सपाशत्रयविश्लेषं शिवत्वं व्यज्यते यया, २ पू
सबीजा च द्विधा भिन्ना प्रथमा शिवधर्मिणी, २७ उ
सबीजा तु भवेद्दीक्षा साधकाचार्ययोरपि, २४ उ
समयादीश्वरेच्छातो मुक्तिर्नास्त्यन्यथा यतः, ७ उ
समासाच्च द्विधैवेयं दीक्षा तज्ज्ञैरिहोच्यते, २१ पू
सर्वत्रैवाधिकारित्वात् साधिकारैव सा तयोः, ३१ उ
सर्वभूतदमनी च मनोन्मनीत्यनन्तकः, ९१ पू
सर्वविद्याभिषेकेण भवेत् साऽऽचार्यगोचरे, ३४ उ
सा च दीक्षाध्वसंशुद्धिः स चाध्वा षड्विधः स्मृतः, ३६ उ
सा चानेकविधा ज्ञेया तत्प्रपञ्चोऽयमुच्यते, १४ उ
साधकाचार्ययोर्नित्यनैमित्तकाम्यकर्मसु, ३१ पू
साधकाचार्ययोः सोक्ता देशकालादिभेदतः, २८ पू
साध्यमन्त्राभिषेके च साधके सा प्रकीर्तिता, ३४ पू
सुरेशशर्वज्येष्ठाश्च भूतपालो बलिप्रियः, ६९ पू
सूक्ष्मः शिवोत्तमश्चैकनेत्ररुद्रौ त्रिमूर्तिकः, ९१ उ
सौम्यं चैव तथा ज्ञेयं प्राज्ञेशं ब्राह्ममष्टमम्, ८१ उ
संचिन्त्य शोध्यते यत्र सैवोक्ता शिवधर्मिणी, २९ पू

संवाहश्च विवाहश्च नभोलिप्सुस्त्रिलोचनः, ७१ पू
संसारी स पशुर्बद्धो मुक्तः पाशत्रयोज्झितः, ८ उ
संस्पृशेच्छिष्यमूर्धादि स्पर्शदीक्षा भवेदियम्, १७ उ
स्वयमेवानुगृह्णाति विज्ञानप्रलयाकलान्, १२ उ
हरिश्चन्द्रोऽथ श्रीशैलो जल्पेशाम्रातकेश्वरौ, ७७ पू
ज्ञातव्यानि प्रतिष्ठायाममरेशादिनामभिः, ८५ पू
ज्ञातव्यान्यमरेशादिषट्पञ्चाशत् पुराणि च, ४५ उ
ज्ञानवती भवेदेका क्रियावत्यपरा स्मृता, २१ उ

उदाहृतग्रन्थसूची

कामिक

कारण

किरण

चिन्त्यविश्व

तत्त्वप्रकाश

तत्त्वसंग्रह

बालज्ञानरत्नावली

वामदेवपद्धति

शिवधर्म

शिक्षाकाराः

सिद्धान्तशेखर

सिद्धान्तसारावली

सुप्रभेद

षट्सहस्रिका

श्रीलैङ्ग

श्रीमत्कालोत्तर

श्रीमत्सर्वज्ञानोत्तर

श्रीमत्सूक्ष्मस्वायम्भुव

श्रीमत्स्वायम्भुव

श्रीमद्रौरव

श्रीमन्मृगेन्द्र

ज्ञानरत्नावली

மானாமதுரை சைவசித்தாந்தச்சரபம் சிவஸ்ரீ **D. தக்ஷிணாமூர்த்தி பட்டர்** அவர்களின் பேரனும் சிவஸ்ரீ **D. தெய்வசிகாமணி பட்டர்** அவர்களின் குமாரனுமாகிய சிவஸ்ரீ **D. ஸோமஸுப்ரஹ்மண்ய பட்டர்** மற்றும் ஸ்ரீமதி **R. ஐச்வர்யா** ஆகியோரின் சிவதீக்ஷைச் சிறப்புமலராக வெளியிடப்படுகிறது.

நாள்: மானாமதுரை ஸ்ரீ ஆனந்தவல்லீ அம்பா ஸமேத ஸ்ரீ ஸோமநாதஸ்வாமி ஆலய ரதோத்ஸவதினம்.
வ்யய வருஷம், ஆடி மாதம், 20-ம் தேதி, (5-8-2006) சனிக்கிழமை.